# ॥ श्री विद्या कवचम् ॥

# Shri Vidya Kavach

**॥ ॐ गण गणपतये नमः ॥**

**॥ देव्युवाच ॥**

देवदेव महादेव भक्तानां प्रीतिवर्धनम् ।
सूचितं यन्महादेव्याः कवचं कथयस्व मे ॥१॥

**॥ महादेव उवाच ॥**

श्रुणु देवि प्रवक्ष्यामि कवचं देवदुर्लभम् ।
न प्रकाश्यं परं गुह्यं साधकाभीष्टसिद्धिदम् ॥२॥
कवचस्य ऋषिर्देवि दक्षिणामूर्तिरव्ययः ।
छन्दः पङ्क्तिः समुद्दिष्टं देवी त्रिपुरसुन्दरी ॥३॥

धर्मार्थकाममोक्षाणां विनियोगस्तु साधने ।
वाग्भवः कामराजश्च शक्तिर्बीजं सुरेश्वरि ॥४॥
ऐं वाग्भवः पातु शीर्षे मां क्लीं कामराजस्तथा हृदि ।
सौः शक्तिबीजं सदा पातु नाभौ गुह्ये च पादयोः ॥५॥

ऐं श्रीं सौः वदने पातु बाला मां सर्वसिद्धये ।
हसौं हसकलह्रीं हसौः पातु भैरवी कण्ठदेशतः ॥६॥
सुन्दरी नाभिदेशे च शीर्षे कामकला सदा ।
भ्रूनासयोरन्तराले महात्रिपुरसुन्दरी ॥७॥

ललाटे सुभगा पातु भगा मां कण्ठदेशतः ।
भगोदया च हृदये उदरे भगसर्पिणी ॥८॥
भगमाला नाभिदेशे लिङ्गे पातु मनोभवा ।
गुह्ये पातु महादेवी राजराजेश्वरी शिवा ॥९॥

चैतन्यरूपिणी पातु पादयोर्जगदम्बिका ।

नारायणी सर्वगात्रे सर्वकार्ये शुभङ्करी ॥१०॥
ब्रह्माणी पातु मां पूर्वे दक्षिणे वैष्णवी तथा ।
पश्चिमे पातु वाराही उत्तरे तु महेश्वरी ॥११॥

आग्नेयां पातु कौमारी महालक्ष्मीस्तु नैरृते ।
वायव्यां पातु चामुण्डा इन्द्राणी पातु ईशके ॥१२॥
जले पातु महामाया पृथिव्यां सर्वमङ्गला ।
आकाशे पातु वरदा सर्वत्र भुवनेश्वरी ॥१३॥

इदं तु कवचं देव्या देवानामपि दुर्लभम् ।
पठेत्प्रातः समुत्थाय शुचिः प्रयतमानसः ॥१४॥
नाधयो व्याधयस्तस्य न भयं च क्वचिद्भवेत् ।
न च मारी भयं तस्य पातकानां भयं तथा ॥१५॥

न दारिद्र्यवशं गच्छेत्तिष्ठेन्मृत्युवशे न च ।
गच्छेच्छिवपुरं देवि सत्यं सत्यं वदाम्यहम् ॥१६॥
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेत्सदा ।
स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्रघातनम् ॥१७॥

**॥ इति श्री विद्या कवचं सम्पूर्णम् ॥**